# ॥ बालमुकुन्दाष्टकम् ॥

करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम्।
वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि॥ १ ॥

संहृत्य लोकान् वटपत्रमध्ये शयानमाद्यन्तविहीनरूपम्।
सर्वेश्वरं सर्वहितावतारं बालं मुकुन्दं मनसा स्मरामि॥ २ ॥

इन्दीवरश्यामलकोमलाङ्गम् इन्द्रादिदेवार्चितपादपद्मम्।
सन्तानकल्पद्रुममाश्रितानां बालं मुकुन्दं मनसा स्मरामि॥ ३ ॥

लम्बालकं लम्बितहारयष्टिं शृङ्गारलीलाङ्कितदन्तपङ्क्तिम्।
बिम्बाधरं चारुविशालनेत्रं बालं मुकुन्दं मनसा स्मरामि॥ ४ ॥

शिक्ये निधायाद्यपयोदधीनि बहिर्गतायां व्रजनायिकायाम्।
भुक्त्वा यथेष्टं कपटेन सुप्तं बालं मुकुन्दं मनसा स्मरामि॥ ५ ॥

कलिन्दजान्तस्थितकालियस्य फणाग्ररङ्गे नटनप्रियन्तम्।
तत्पुच्छहस्तं शरदिन्दुवक्त्रं बालं मुकुन्दं मनसा स्मरामि॥ ६ ॥

उलूखले बद्धमुदारशौर्यम् उत्तुङ्गयुग्मार्जुन-भङ्गलीलम्।
उत्फुल्लपद्मायत-चारुनेत्रं बालं मुकुन्दं मनसा स्मरामि॥ ७ ॥

आलोक्य मातुर्मुखमादरेण स्तन्यं पिबन्तं सरसीरुहाक्षम्।
सच्चिन्मयं देवमनन्तरूपं बालं मुकुन्दं मनसा स्मरामि॥ ८ ॥

॥ इति श्री-बालमुकुन्दाष्टकं सम्पूर्णम् ॥

आकुञ्चितं जानु करं च वामं न्यस्य क्षितौ दक्षिणहस्तपद्मे।
आलोकयन्तं नवनीतखण्डं बालं मुकुन्दं मनसा स्मरामि॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Balamukundashtakam.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits